**I**

Total No. of Questions—16

Total No. of Printed Pages—4 **Regd. No.** | | | | | | | | | | |

**Part II**

**SANSKRIT**

**Paper II**

**(Second Language)**

***Time : 3 Hours*** ***Max. Marks : 100***

**Note** :—(1) *ALL* questions should be attempted.

(2) Question Nos. 1, 2 and 3 should be answered either in the medium of instructions of the candidate or in Sanskrit (Devanagari Script).

(3) The remaining questions should be answered in Sanskrit (Devanagari Script) only.

सूचना :— प्रथम, द्वितीय, तृतीय प्रश्नान् विहाय अन्ये सर्वेऽपि प्रश्नाः संस्कृतभाषायामेव समाधातव्याः।

1. एकस्य श्लोकस्य प्रतिपदार्थं भावं च लिखत– 1×8=8

(अ) कुर्वीत सङ्गं सद्भिर्नासद्भिर्गुणवर्जितैः।
प्राप राघवसङ्गत्या प्राज्यं राज्यं विभीषणः॥

(आ) दानं धर्मश्च विद्या च रूपं शीलं कुलं तथा।
सुखमायुर्यशश्चैव नवगोप्यानि यत्नतः॥

2. एकं निबन्धप्रश्नं समाधत्त– 1×6=6

(अ) खड्गप्रदानकथां लिखत।

(आ) हरिश्चन्द्रः स्वस्य सत्यसन्धत्वं कथम् अपालयत् ?

3. एकं निबन्धप्रश्नं समाधत्त–. 1×6=6

(अ) गोपालः कृष्णः कथं गोविन्दः अजायत ?

(आ) चूडाला शिखिध्वजस्य मनः कथं परिवर्तितवती ?

4. **त्रयाणां** प्रश्नानां समाधानं लिखत— 3×2=6

(अ) भरत: कीदृशं रामं द्रष्टुमैच्छत् ?

(आ) राज्यं नाम कीदृशम् ?

(इ) मित्रावसो: मुखात् नागानां कथां श्रुत्वा जीमूतवाहन: आत्मगतं किमिति अचिन्तयत् ?

(ई) गरुडेन क: त्वमिति पृष्ट: जीमूतवाहन: किमवदत् ?

(उ) पार्वती तप: कथम् आचरति ?

(ऊ) ऐरावताधिरूढ: देवेन्द्र: किमर्थं प्रतीक्षते ?

5. **द्वयो:** ससन्दर्भं व्याख्यानं लिखत— 2×3=6

(अ) विशाम्यहं हि पातालं तरसा गृह्य शङ्करम्।

(आ) ध्रुवमूष्मणि दारुणो दवाग्नि:।

(इ) ब्रह्मर्षिणा तेन जितोऽस्मि सत्यम्।

(ई) ननु भो: मातु:, शिशुं मा भिद:।

6. **द्वयो:** ससन्दर्भं व्याख्यानं लिखत— 2×3=6

(अ) यदि कौतूहलम् आकर्ण्यताम्।

(आ) भवन्तमभिषेक्तुम् आगतं मया।

(इ) मन: एव मनुष्याणां कारणं बन्धमोक्षयो:।

(ई) कमपि प्रतीकारं कुरुष्व।

7. **त्रयाणां** प्रश्नानां समाधानं लिखत— 3×2=6

(अ) कस्या: पतनं पृथिवी न सहिष्यति ?

(आ) अगस्त्य: कम्परायाय किमर्थं खड्गं प्रेषयति ?

(इ) कस्मात् युधिष्ठिर: नरकक्लेशं ददर्श ?

(ई) किं त्यागेनैव उपलभ्यते ?

(उ) विश्वामित्र: हरिश्चन्द्राय किं ददे इति अवदत् ?

(ऊ) अयं पुष्पविलाप: कस्य कवे: ग्रन्थस्य अनुवाद: भवति ?

8. **त्रयाणां** प्रश्नानां समाधानं लिखत— 3×2=6

(अ) शूद्रकस्य राजधानी का ?

(आ) गोपा: इन्द्रस्य पूजां त्यक्त्वा कस्य पूजां कृतवन्त: ?

(इ) सहस्रलोचन: वीरं किमवदत् ?

(ई) कदा नरेन्द्रस्य विस्मय: द्विगुण: अजायत ?

(उ) चूडाला स्वपतिदेवं किमिति अवदत् ?

(ऊ) क: स्वर्गराज्यम् आक्राम्यत् ?

9. **एकेन** वाक्येन समाधानं लिखत— 5×1=5

(अ) भगीरथः कुत्र तपः आतिष्ठत् ?

(आ) शिशुपालस्य शिरः केन छिन्नम् ?

(इ) शूरं केन भेदयेत् ?

(ई) सत्यविजयः इत्ययं पाठ्यभागः केन विरचितः ?

(उ) पुष्पविलापः संस्कृते केन अनूदितः ?

10. **एकेन** वाक्येन समाधानं लिखत— 5×1=5

(अ) शुकस्य नाम किम् ?

(आ) वीरः राज्ञः कण्ठे कीदृशीं दिव्यमालां समर्पितवान् ?

(इ) श्रीरामकृष्णः कीदृशः इति नरेन्द्रः मनसि निश्चितवान् ?

(ई) उज्जयिन्याः राजा कः ?

(उ) पूर्णाहुतिकाले यज्ञकुण्डात् कः असुरः निर्गतः ?

11. अधोनिर्दिष्टं कथां पठित्वा प्रश्नानां समाधानानि दत्त— 5×1=5

एकस्मिन् वने एकः अजशाबकः मात्रासह स्वामिनः प्रियतमः सन् निवसति स्म। सः शाबकः मातरं त्यक्त्वा न गच्छति स्म। अजस्वामी एकस्मिन् दिने अजसमूहं वनं चारणाय नीतवान्। तस्मिन् दिने शाबकः आनन्देन चरन् इतः ततः विचरति स्म। हठात् मेघावृतः आकाशः। सर्वत्र वने वारि आगतम्। अजस्वामी सर्वान् अजान् एकत्र आनीय अग्रे अचलत्। शाबकः मातुः च्युतः। स च मातरम् उद्दिश्य शब्दं कुर्वन् सर्वत्र अन्विष्टवान्। किन्तु सः मातरं न प्राप्तवान्। माता अपि शाबकाय शब्दम् अकरोत्। किन्तु अजस्वामी अलक्ष्यं कृत्वा अजसमूहम अग्रे प्रसारितवान्। शाबकस्य मनः मातुः मेलनाय चिन्ताक्रान्तम् आसीत्। एकं जलाशयम् अपश्यत्। तत्र गत्वा जलं पिबन् आसीत्। अत्रान्तरे वृकः एकः आगत्य तं भक्षितवान्। वृकोऽपि सिंहेन भक्षितः।

**प्रश्नाः—**

(1) अजशाबकः कुत्र वसति स्म ?

(2) अजस्वामी चारणाय कं वनं नीतवान् ?

(3) माता अपि शाबकाय किम् अकरोत् ?

(4) शाबकं कः भक्षितवान् ?

(5) वृकः केन भक्षितः ?

12. नामनिर्देशपूर्वकं **त्रीणि** सन्धत्त— 3×2=6

(अ) रामस् + शेते

(आ) चक्रिन् + ढौकसे

(इ) वाक् + वादः

(ई) तत् + नाम

(उ) तपः + वनम्

(ऊ) बालः + खादति।

13. नामनिर्देशपूर्वकं **त्रीणि** विघटयत— 3×2=6

(अ) मनश्छलति

(आ) तट्टीका

(इ) सुबन्तम्

(ई) वाङ्महिमा

(उ) नमस्ते

(ऊ) गुरुर्जयति।

14. **द्वयोः** शब्दयोः सविभक्तिरूपाणि लिखत— 2×6=12

(अ) भिषक्

(आ) संपत्

(इ) नामन्

(ई) एतद् (स्त्रीलिङ्गः)

15. समासनामनिर्देशपूर्वकं **त्रयाणां** विग्रहवाक्यानि लिखत— 3×2=6

(अ) यथाशक्ति

(आ) राजपुरुषः

(इ) विद्याधनम्

(ई) सप्तरात्रम्

(उ) विशालाक्षी

(ऊ) रामलक्ष्मणौ

16. अधोरेखाङ्कितपदं शुद्धीकृत्य वाक्यं लिखत— 5×1=5

(अ) छात्रः गुरुं नमस्कुर्वन्ति।

(आ) वृक्षात् फलम् अपतन्।

(इ) सः विद्यालये अपठताम्।

(ई) युवां जलं पास्यथ।

(उ) वयं विपणिं गमिष्यामि।